तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ॥
नर्म्मदाया जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिञ्च न पश्यन्ति तस्य तीर्थप्रभावतः ॥
एतत्तीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
सर्व्वपापविशुद्धात्मा व्रजते रुद्रमन्दिरम् ॥
जलप्रवेशं यः कुर्य्यात् तस्मिंस्तीर्थे नराधिप ! ।
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ।
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ॥
अनशनन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ! ।
गर्भवासे तु राजेन्द्र ! न पुनर्जायते नरः ॥"
इति मात्स्ये १९५ । १९६ अध्यायौ ॥

सा च पुरुकुत्सभार्य्या । तस्याः स्मरणे विषनाशो भवति । यथा, "सकलपन्नगपतयश्च नर्म्मदायै वरं ददुः । यस्त्वेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति न तस्य सर्पविषं भविष्यतीति । अत्र च ।
"नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः ॥"
इति विष्णुपुराणे । ४ । ३ । ९—१० ॥

नल, त बन्धे । इति नलशब्दस्य व्युत्पत्तौ भरतः ॥ (भ्वा-परं-सकं-सेट् ॥)

नलं, क्ली, (नलतीति । नल + अच् ।) पद्मम् । इति राजनिर्घण्टः ॥

नलः, पुं, (नल बन्धे + पचाद्यच् ।) तृणविशेषः । तत्पर्य्यायः । धमनः २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ नालः ४ नड़ः ५ शुषिरन्ध्रः ६ कीचकः ७ दीर्घवंशः ८ शून्यमध्यः ९ विभीषणः १० छिद्रान्तः ११ मृदुपत्रः १२ वंशपत्रः १३ मृदुच्छदः १४ नालवंशः १५ । अस्य गुणाः । शीतत्वम् । कषायत्वम् । मधुरत्वम् । रुचिकारित्वम् । रक्तपित्तप्रशमनत्वम् । दीपनत्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥
उष्णो हृद्वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥"
इति भावप्रकाशः ॥

सूर्य्यवंशीयनिषधराजपुत्त्रः । यथा,—
"अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ।
नलस्तु नैषधस्तस्मान्नभस्तस्मादजायत ॥"
वीरसेनराजपुत्त्रः । यथा, मात्स्ये १२ अध्याये ।
"नलौ द्वावेव विख्यातौ वंशे काश्यपसम्भवे ।
वीरसेनसुतस्तद्वन्नैषधश्च नराधिप ॥"
(तथा, हरिवंशे । १५ । ३४ ।
"नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ ! ।
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥"
एतौ द्वावेव सूर्य्यवंशीयौ ॥) चन्द्रवंशीयनिषधराजपुत्त्रः । (अयन्तु दमयन्तीपतिः ।) यथा, दमयन्तीं प्रति नलवाक्यम् ।
"सुधांशुवंशस्य करीरमेव मां
निशम्य किन्नासि फलेग्रहि ग्रहा ॥"
इति नैषधः ॥

(यथा, महाभारते । ३ । ५३ । १ ।
"आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ॥"
अयं वीरसेनस्तु सूर्य्यवंशीयवीरसेनाद्भिन्न एवेत्यवगन्तव्यम् ॥ * ॥

आसीत् पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा । गच्छति काले स हि हंसमुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य हंसमुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्त्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमान एनं प्रति रुष्टः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्रात्रा पुष्करेण सह द्यूतक्रीड़नात् सर्व्वस्वमहारयत् । ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अस्य दमयन्तीसहवाससुखमसहिष्णुः दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् कल्यावेशितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह मातृश्वसृगृहं गतवती । नानाविधक्लेशात् शीर्णदेहा सा मातृश्वसापि अविज्ञाता तद्भवने तस्थौ । अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास । दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन् । भीमस्तु तां स्वगृहमानयत् । नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं कर्कोटकनागं विपद उज्जहार । कर्कोटकस्तु नलस्य प्रत्युपकर्त्तुमिच्छन् शरीरस्थमस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास । नलस्तु केवलं रूपान्तरत्वमाप्तवान् । ततोऽसौ ऋतुपर्णस्य राज्ञः सारथ्ये नियुक्त आसीत् । अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयंवरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास । दमयन्ती तु पाकादिकौशलेनान्यजनावेद्येन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास । अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्य्ये गृहीते भैम्या सह मेलनं सञ्जातम् । भीमनृपतिस्तु एतत् सर्व्वमाकर्ण्यातिशयसन्तोषमवाप्तवान् प्रेषयामास च तं बहुसमारोहेण निषधदेशान् प्रति । ततोऽयं स्वदेशमागम्य भ्रातरं पुष्करं पुनर्द्यूताय आहूय पराजित्य च तं पुनर्लब्धराज्यो दमयन्त्या सह सुखमुवास । एतद्विवरणविस्तृतिस्तु महाभारते वनपर्व्वणि ५३—७९ अध्यायेषु विशेषतो द्रष्टव्या ॥ * ॥)

वानरविशेषः । स तु कृतध्वजमुनिशापात् वानररूपविश्वकर्म्मण औरसेन घृताच्यप्सरोगर्भे गोदावरीतीरे जातः । इति वामने ६२ अध्यायः ॥ (अयन्तु रामवाक्येन समुद्रमध्ये सेतुं बबन्ध । यथा, अध्यात्मरामायणे । ६ । ३ । ८४—८६ ।
"ततोऽब्रवीत् रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मणः ॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ।
कीर्त्तिं जागन्तु ते लोकाः सर्व्वलोकमलापहाम् ॥
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥")

पितृदेवः । इति मेदिनी । ले, २७ ॥ दैत्यविशेषः । यथा,—
"दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः ।
सैंहिकाया इति ख्यातास्त्रयोदश महाबलाः ॥
वंश्यः शल्यश्च बलवान् नलश्चैव तथा बलः ।
वातापिर्नमुचिश्चैव इल्वलः स्वसृमस्तथा ॥
अञ्जको नरकश्चैव कालनाभस्तथैव च ।
सवमानस्तथा चैव सुरकल्पस्य वीर्य्यवान् ॥"
इति ब्रह्मपुराणे २ अध्यायः ॥

नलकं, क्ली, (नल इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) शाखास्थि । इति हेमचन्द्रः । ३ । २९१ ॥ (यथा, सुश्रुते निदानस्थाने १५ अध्याये ।
"तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु ॥")

नलकिनी, स्त्री, (नलकानि सन्त्यस्याः । नलक + इनिः । ङीप् ।) जङ्घा । इति हेमचन्द्रः । ३ । २७८ ॥

नलकीलः, पुं, (नलवत् कीलो यत्र ।) जानुः । इति हेमचन्द्रः । ३ । २७८ ॥

नलकूवरः, पुं, कुवेरपुत्त्रः । इत्यमरः । १ । १ । ७३ ॥ (यथा, राजेन्द्रकर्णपूरे । ९९ ।
"विलोकनकथापि मे न नलकूवरे न स्मरे
किमन्यदन्यतद्युतेरपि न दर्शनं प्रार्थये ।
अयं नयनगोचरं व्रजति चेद्दृशासुतस्तव
समस्तरमणीमनो मधुपमाधवः माधवः ॥")
स भ्रात्रा मणिग्रीवेण सह वारुणीं पीत्वा कैलासोपवने गङ्गायां नग्नौ जलेषु क्रीड़ितवान् । असंवृतवस्त्रौ तौ दृष्ट्वा नारदः शशाप । तच्छापेन तौ यमलार्जुनौ भूत्वा श्रीवृन्दावने आसतुः । ततो दामोदरेण शापनिर्म्मुक्तौ तं नुत्वा स्वगृहं जग्मतुः । इति श्रीभागवतीयदशमस्कन्धः ॥

नलदं, क्ली, (नलं द्यति अवखण्डयतीति । दो + कः ।) पुष्परसः । उशीरम् । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥")
जटामांसी । इति मेदिनी । दे, ३३ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेषी मांसी क्रव्यजटा जटी ।
किराततिनी च जटिला लोमशा तु तपस्विनी ॥"
नलं ददातीति । दा + आतोऽनुपेति कः ।) नलदातरि, त्रि, ॥